याति यो व्याधिः स ज्ञेयः कर्मजो बुधैः । दोषजाः मिथ्याहारविहारप्रकुपितवातपित्तकफजाः । ननु मिथ्याहारविहारिणामपि प्राक्तनसुकृतेन नैरुज्यं दृश्यत एव । ततो दोषजेष्वपि प्राक्तनं दुष्कर्मैव कारणम् तत् कथं दोषजा इत्युच्यन्ते ? । दोषजेष्वपि वस्तुतः आदिकारणं दुष्कर्म वर्त्तत एव किन्तु तत्र मिथ्याहारविहारदूषिता दोषा हेतवो दृश्यन्त इति दोषजा इत्युच्यन्त इति समाधिः । कर्मदोषोद्भवाः । स्वल्पदोषा गरीयांसस्ते ज्ञेयाः कर्मदोषजाः। अत्र कारणं दुष्कर्म प्रबलं यतो दोषाल्पत्वेऽपि व्याधेर्गरीयस्त्वन्तत्कर्मक्षयादेव क्षीणं भवति। दोषाः स्वल्पा अपि निदानत्वेनोक्ता दृश्यन्त एवेति दोषाणां कारणतां मन्यन्त इति । कर्मक्षयात् कर्मकृता दोषजाः स्वस्वभेषजैः । कर्मदोषोद्भवा यान्ति कर्मदोषक्षयात् क्षयम् । दोषजाः स्वस्वभेषजैरिति दोषजेष्वादिकारणम् दुष्कर्म तद्भेषजार्थद्रव्यक्षयादिजनित दुःखभोगेन कटुतिक्तकषायाद्यहृद्यभक्षणादिजनितदुःखभोगेन च क्षयं यान्ति । शेषा दुष्टा हेतवो दोषास्ते स्वस्वभेषजैः क्षयं यान्तीत्यर्थः । २कायिकवाचिकमानसकर्मभवे स्थावरादिजन्मनि“शुभाशुभफलं कर्म्म मनोवाग्देहसम्भवम् । कर्मजा गतयो नृणामुत्तमाधममध्यमाः” ३कर्म्मजातमात्रे पापादिदोषे च“तथा दहति वेदज्ञः कर्म्मजं दोषमात्मनः” मनुः। क्रियाजन्ये४संयोगे ५विभागे च।“अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः। कीर्त्तितस्त्रिविधस्त्वेष आद्योऽन्यतरकर्मजः । तथोभयक्रियाजन्यो भवेत् संयोगजोऽपरः । आदिमः श्येनशैलादिसंयोगः परिकीर्त्तितः । मेषयोः सन्निपातो यः स द्वितीय उदाहृतः । कपालतरुसंयोगात् संयोगस्तरुकुम्भयोः। तृतीयः स्यात् कर्मजोऽपि द्विधैव परिकीर्त्तितः । अभिघातो नोदनञ्च शब्दहेतुरिहादिमः । शब्दाहेतुर्द्वितीयः स्याद्विभागोऽपि त्रिधा भवेत् । एककर्मोद्भवस्त्वाद्यो द्वयकर्मोद्भवोऽपरः । विभागजस्तृतीयः स्यात् तृतीयोऽपि द्विधा भवेत्” भाषा० ६वेगाख्यसंस्कारे च“मूर्त्तमात्रे तु वेगः स्यात् कर्मजो-वेगजः क्वचित्”भाषा०७वटवृक्षे पु० जटा० । ८कलियुगे पु० शब्दर० । क्रियाजकर्मभवादयोऽप्यत्रार्थे । ९धर्माधर्म्मरूपे गुणभेदे अदृष्टे वेदान्तिमते कर्मणः सूक्ष्मावस्थापन्ने १०संस्कारभेदे ११स्वर्गे १२नरके च अदृष्टद्वारा तयोः कर्मजन्यत्वात्तथात्वम् ।

**कर्म्मजित्** पु० जरासन्धवंश्ये मागधे नृपभेदे “अथ मागधराजानो भाविनो ये वदामि ते”भविता सहदेवस्य (जरासन्धपुत्रस्य) मार्ज्जारिर्यच्छ्रुतश्रवाः । ततोऽयुतायुस्तस्यापि निरमित्रोऽथ तत्सुतः । सुनक्षत्रः, सुनक्षत्रात् वृहत्सेनोऽथ कर्म्मजित्” भाग० ९,२२,३० ।

**कर्म्मठ** त्रि० कर्मणि घटते कर्म्मन्+अठच् । कर्म्मनिष्पादनार्थं घटमाने ।“स कर्मठः कर्म्म सुतानुबन्धि”भट्टिः ।

**कर्म्मणि** स्त्री कर्म्म नयति समाप्तिम् नी–बा०ङि णत्वम् । कर्म्मसमाप्तौ कर्त्तव्यायां प्रायश्चित्तेष्टौ । “कर्म्मणिरेव तत्र प्रायश्चित्तिः” शत० ६,६,४,९ ।

**कर्म्मण्य** त्रि० कर्म्मणा सम्पादि यत् । १कर्म्मणा सम्पन्ने शौर्ये सि०कौ०। कर्म्मणि साधु यत् ।२कर्मकुशले सि०कौ०। “यतो वीरः कर्मण्यः सुदक्षः” ऋ०२,४,९ ।“अकर्मण्यं तिथिमलं विद्यादेकादशीं विना” ति०त० । ३वेतने स्त्री क्षीरस्वामी । वेतनेन हि कर्मसाधनात् तस्य तथात्वम् ।

**कर्मण्यभुज्** त्रि० कर्मण्यां वेतनं भुङ्क्ते भुज–क्विप् ईत० ङ्यापोरिति ह्रस्वः । वेतनेन कर्मकारके भरण्यभुगित्यमरपाठान्तरमिति क्षीर०।

**कर्मदेव** पु० कर्मणा देवः प्राप्तदेवभावः । १त्रयस्त्रिंशद्देवभेदे । “स एकः कर्मदेवानामानन्दः ये कर्मणा देवानपि यन्ति श्रोत्रियस्य चाकामहतस्य ते,ये शतं कर्मदेवानामानन्दाः” तै०उ० । “कर्मदेवा ये वैदिकेनाग्निहोत्रादिना केवलेन देवानपि यन्ति, देवा इति त्रयस्त्रिंशद्धविर्भुजः। इन्द्रस्तेषां स्वामी तस्याचार्य्यो वृहस्पतिः । प्रजापतिर्विराट् त्रैलोक्यशरीरो ब्रह्मा समष्टिव्यष्टिस्वरूपः संसारमण्डलव्यापी” शाङ्कर भा०। त्रयस्त्रिंशच्च देवाः आनन्दगिरिणा दर्शिताः । “अष्टौ वसवः एकादश रुद्राः द्वादशादित्याः इन्द्रः प्रजापतिश्चेति” २कर्मणा देवलोकं गते च । “स एकः कर्मदेवानामानन्दो ये कर्मणा देवत्वमभिसम्पद्यन्ते अथ ये शतं कर्मदेवानामानन्दाः” शत० ब्रा०१४,७,१,२५ । ये अग्निहोत्रादिश्रौतकर्मणा देवलोकं प्राप्नुवन्ति ते कर्मदेवाः” भा० ।

कर्मदेवताऽप्यत्र स्त्री। “ज्योतिष्टोमादिना स्वर्गं प्राप्ताः स्युः कर्मदेवताः” शब्दचि० । अस्मिन् कल्पेऽश्वमेधादि कर्म कृत्वा महत्पदम् । अवाप्याजानदेवैर्याः पूज्यास्ताः कर्मदेवताः” इति शब्दचि० पु० ।

**कर्म्मदोष** पु० कर्मैव दोषः,कर्म्मणि दोषः,कर्महेतुर्दोषो वा । १दुष्टे पापजनके हिंसादौ कर्मणि । “संन्यस्य सर्वकर्माणि कर्मदोषानपानुदन्” शरीरजैःकर्मदोषैर्याति